वर्षान्तरेऽप्ययुक्तक्षणे ऽपि तच्छ्राद्धकरणे न पार्व्वणं किन्त्वेकोद्दिष्टमिति । अत्र पार्व्वणो विधिः पार्व्वणेतिकर्त्तव्यताकैकोद्दिष्टविधिरिति नव्यवर्द्धमानप्रभृतयः । तत्र पूर्व्ववचनोक्तत्रैपुरुषिकस्य मृताहे पर्युदस्तस्य पार्व्वणोविधिरित्यनेन प्रतिप्रसवात् । तस्मात् सदैकोद्दिष्टं त्रैपुरुषिकं न तु षाट्पौरुषिकं "कर्षूसमन्वितं मुक्त्वा तथाद्यं श्राद्धषोडशम् । प्रत्याब्दिकञ्च शेषेषु पिण्डाः स्युः षडिति स्थितिः" इति छन्दोगपरिशिष्टवचनेन प्रत्याब्दिकव्यतिरेकेण षट्संख्यानियमात् एवममावस्यादिमरणनिमित्तेन मातुरपि प्रत्याब्दिकं पार्व्वणविधिनैव "अपुत्रा ये मृताः केचित् स्त्रियो वा पुरुषाश्च ये । तेषामपि च देयं स्यादेकोद्दिष्टं न पार्व्वणम्" इति आपस्तम्बवचने अपुत्रा इति विशेषणोपादानात् सपुत्राणां पार्व्वणाभ्यनुज्ञानात् । एतच्च मात्रादित्रितयदैवतं कार्य्यम् । "मात्रे पितामह्यै प्रपितामह्यै पूर्व्ववत् ब्राह्मणान् भोजयित्वा" इत्यन्वष्टकायां तथादर्शनात् अवस्थानदिननिमित्तत्वेन पार्व्वणविधिना छन्दोगैरपि मात्रादित्रिकाणां श्राद्धं कर्त्तव्यम् "न योषिद्भ्यः पृथग् दद्यादवसानदिनादृते" । इति छन्दोगपरिशिष्टवचने विशेषतः प्रतिप्रसवात् । एवं सपिण्डीकरणेऽपि । एतच्च मृताहपार्व्वणं मातापित्रोरेव । तथा च हेमाद्रिधृतकात्यायनवचनम् "सपिण्डीकरणादूर्द्ध्वं पित्रोरेव हि पार्व्वणम् । पितृव्यभ्रातृमातॄणामेकोद्दिष्टं सदैव तु" । मातृपदं सपत्नीमातृपरम् । सपत्नीमात्रित्यत्र मातृपदस्य राजदन्तादित्वात् परनिपातः ततश्च वाक्ये मातृसपत्नीति न प्रयोज्यं किन्तु सपत्नीमातरित्यादिकम् । एवं साग्निकौरसक्षेत्रजाभ्यां मृताहे पार्व्वणं कर्त्तव्यम् "औरसक्षेत्रजौ पुत्रौ विधिना पार्व्वणेन तु । प्रत्यब्दमितरे कुर्युरेकोद्दिष्टं सुता दश" इति जाबालवचनस्य "यत्र यत्र प्रदातव्यं सपिण्डीकरणात् परम् । पार्व्वणेन विधानेन देयमग्निमता सदा" इति मत्स्यपुराणवचनस्य चैकवाक्यत्वात् । उशना च "प्रत्यब्दं दर्शवच्छ्राद्धं साग्निः कुर्व्वीत वै द्विजः । एकोद्दिष्टं सदा कुर्य्यान्निरग्निः श्राद्धदः सुतः" । अत्र नि०सि० विशेषमाह
वृद्धपराशरः "संग्रामे संस्थितानाञ्च प्रेतपक्षे शशिक्षये । तेषां पार्व्वणमेवोक्तं चयाहेऽपि च सत्तमैः" । "चन्द्रक्षयानामकसंयुगेषु यः प्रेतपक्षे मृतवान् सपिण्डः । सपिण्डितानामपि चाब्दिकानि भवन्ति तेषामिह पार्व्वणानि" । तथा "भ्रातुर्ज्येष्ठस्य कुर्व्वीत ज्येष्ठो भ्रातानुजस्य च । दैवहीनं तु तत्कुर्य्यादिति धर्म्मविदब्रवीत्" । दैवहीनमेकोद्दिष्टम् ज्येष्ठो भ्रातानाद्यगर्भजः तथा च तत्रैव शातातपः "अनाद्यगर्भोज्येष्ठोऽपि भ्राता सद्भिर्निगद्यते । ऋते सपिण्डनात्तस्य नैव पार्व्वणमाचरेत्" । आद्यगर्भे तु पार्व्वणमेकोद्दिष्टं वेत्यर्थः । मातस्तु हेमाद्रौ कात्यायनः "प्रत्यब्दं यो यथा कुर्य्यात् पुत्रः पित्रे सदा द्विजः । तथैव मातुः कर्त्तव्यं पार्व्वणं चान्यदेव वा" । यत्तु तेनैवोक्तम् "सपिण्डीकरणादूर्ध्वं पित्रोरेव हि पार्व्वणम् । पितृव्यभ्रातृमातॄणामेकोद्दिष्टं सदैव तु" इति तत् सापत्नमातृपरम् । यत्तु वृद्धपराशरः "अपुत्रस्य पितृव्यस्य तत्पुत्रो भ्रातृजो भवेत् । स एवास्य तु कुर्व्वीत पिण्डदानादिकक्रियाम् । पार्व्वणं तेन कार्य्यं स्यात् पुत्रवद्भ्रातृजेन तु । पितृस्थाने तु तं कृत्वा शेषं पूर्व्ववदाचरेत्" इति तत्पितृवद्देशाचारवद्व्यवस्थितमिति पृथ्वीचन्द्रः । श्राद्धदीपकलिकायां चतुर्विंशतिमते तु "पितृव्यभ्रातृमातॄणां ज्येष्ठानां पार्व्वणं भवेत् । एकोद्दिष्टं कनिष्ठानां दम्पत्योः पार्व्वणं मिथः । अपुत्रस्य पितृव्यस्य भ्रातुस्सैवाग्रजन्मनः । मातामहस्य तत्पत्न्याः श्राद्धं पार्व्वणवद्भवेत्" इत्युक्तं तत्पत्न्याः कर्त्तृत्वेऽपि पार्व्वणमेव "पुत्राभावे स्वयं पत्न्याः स्वभ्रातॄणाममन्त्रकम् । सपिण्डीकरणं कुर्युस्ततः पार्व्वणमेव च" इति लौगाक्षिस्मृतेः । "ततः पत्न्यपि कुर्व्वीत सापिण्ड्यं पार्व्वणं तथेति" सुमन्तूक्तेश्चेति निर्णयामृते उक्तम् । अन्ये त्वेतत्पाक्षिकपार्व्वणपरमाहुः अतएव "भर्त्तुः श्राद्धं तु या नारी मोहात्पार्व्वणमाचरेत् । न तेन तृप्यते भर्त्ता कृत्वा तु नरकं व्रजेत्" इति वचनं क्षयाहे पाक्षिकैकोद्दिष्टप्रशंसार्थं न पार्व्वणनिषेधार्थमित्युक्तं त्रिस्थलीसेतौ भट्टचरणैः । स्वभर्त्तृप्रभृतित्रिभ्य इत्यनेन विरोधाच्च अपुत्राणाम् चाह हेमाद्रावापस्तम्बः "अपुत्रा ये मृताः केचित् स्त्रियो वा पुरुषाश्च ये । तेषामपि च देयं स्यादेकोद्दिष्टं न पार्व्वणम् । मित्रबन्धुसपिण्डेभ्यः स्त्रीकुमारीभ्य एव च । दद्याद्वै मासिकं श्राद्धं सांवत्सरमतोऽन्यथा" । पारिजाते तु अन्यथा पार्व्वणमित्युक्त्वा सर्व्वत्र पार्व्वणमित्युक्तम् एकोद्दिष्टवाक्यानि तु तीर्थमहालयपराणीत्युक्तम् । पृथ्वीचन्द्रोदये वृद्धगार्ग्यः "मातुः सहोदरा या च पितुः सहभवा च या । तयोश्च नैव कुर्व्वीत पार्व्वणं पिण्डनादृते" प्रचेताः "सपिण्डीकरणादूर्ध्वं